A

शिक्षा का अधिकार
सर्व शिक्षा अभियान
सब पढ़ें सब बढ़ें

811

# Annual Evaluation-2018

## First Language Part I - Paper -I

## SANSKRIT

(For Academic and Oriental Sanskrit Schools )

Class -VIII

Time - 1½ Hours
Total Score - 40

निर्देशाः -

- १५ निमेषाः समाश्वासकालः। प्रश्नान् पठितुम् अयं कालः उपयोक्तव्यः।
- प्रश्नान् निर्देशान् च सम्यक् अवगम्य एव उत्तराणि लेखनीयानि ।
- उत्तरलेखने मूल्याङ्काः कालः च परिगणनीयाः।
- विवर्तनप्रश्नात् ऋते सर्वेषां प्रश्नानाम् उत्तरलेखने देवनागरीलिपिः उपयोक्तव्या।

**I. चतुर्णां प्रश्नानां समुचितमुत्तरं कोष्ठकात् चित्वा लिखत।** 4x1=4

क) केरलकालिदासेन विरचितं सन्देशकाव्यं किम् ?

(मेघसन्देशम् , मयूरसन्देशम् , शुकसन्देशम्, कोकिलसन्देशम्)

ख) 'मदीयसृष्टौ जीविनां स्वभावजाः गुणाः भिन्नाः च '। कस्य वचनमिदम् ?

(अलाबुलतायाः, प्रकृतिमातुः, नारिकेलवृक्षस्य, सूर्यस्य)

ग) 'अल्पज्ञः सर्वज्ञभावं प्रकटयति'। अत्र कः न्यायः ?

(कूपमण्डूकन्यायः, अन्धपङ्गुन्यायः, स्थालीपुलाकन्यायः, अरण्यरोदनन्यायः )

घ) सिंहदिलीपसंवादः कस्मिन् महाकाव्ये भवति ?

(कुमारसम्भवे, किरातार्जुनीये, विशाखविजये, रघुवंशे)

ङ) ........ नमस्कृत्य वदामि ।

( अहम्, सः, मया, त्वम् )

**II. पट्टिकां पूरयत।** 3x1=3

| कृतिः | कर्ता | विभागः |
|---|---|---|
| ऊरुभङ्गम् | ............... | नाटकम् |
| विशाखविजयम् | केरलकालिदासः | .................... |
| ............... | पतञ्जलिः | शास्त्रग्रन्थः |

III -VI प्रश्नेषु त्रयाणाम् उत्तराणि लिखत । 3x2=6

III. अधोदत्तवाक्यात् सम्बोधनरूपे चित्वा लिखत ।

जात! सुयोधन! देहि मे प्रतिवचनम् ।

IV. "क्षमा" विषयप्रतिपादकं सुभाषितं चित्वा लिखत ।

क) विपदि धैर्यमथाभ्युदये क्षमा
सदसि वाक्पटुता युधि विक्रमः।
यशसि चाभिरुचिर्व्यसनं श्रुतौ
प्रकृतिसिद्धमिदं हि महात्मनाम् ।।

ख) क्षमाशस्त्रं करे यस्य
दुर्जनः किं करिष्यति।
अतृणे पतितो वह्निः
स्वयमेवोपशाम्यति ।।

V. उदाहरणानुसारं वाक्यं परिवर्त्य लिखत।

उदा - मासिकायां कविताः सन्ति । तत्र कथाः च सन्ति ।
मासिकायां **न केवलं** कविताः **किन्तु** कथाः च सन्ति ।

क) कानने मृगाः सन्ति । तत्र पक्षिणः च सन्ति।

VI. संख्याम् अक्षरैः (देवनागरीलिप्या) लिखत।

2018 - ............................................... ।

VII - IX प्रश्नेषु द्वयोः उत्तरं लिखत। 2x4=8

VII. केरलकालिदासम् अधिकृत्य सूचनाः उपयुज्य लघुटिप्पणीं लिखत ।

**सूचनाः** - केरलवर्मवलियकोयित्तम्पुरान् – अभिज्ञानशाकुन्तलविवर्तनम् – कैरली-संस्कृतम् - क्षमापणसहस्रम्, श्रीपद्मनाभपदपद्मशतकम् - क्रिकट्क्लब् स्थापकः - कविसार्वभौमः।

VIII. सम्भाषणांशान् पूरयत ।

पुत्रः प्रातःकाले विद्यालयगमनात् पूर्वं पाकशालायां गृहकार्यनिरतां मातरं भाषते ।

माता - पुत्र ! शीघ्रं खादतु। ........................ गन्तुं समयः आसन्नः ।

पुत्रः - मातः! भवती स्थाल्याः ओदनं आदाय किं करोति?

माता - अहं स्थाल्याः .................. आदाय पक्वं वा न वा इति शोधयामि।

पुत्रः - एकमेव परीक्ष्य .................. निर्णेतुं शक्यते वा ?

माता - आम् । तथा चेत् पात्रस्थानाम् ओदनानां पक्वतां निर्णेतुं शक्यते ।

पुत्रः - एतत् उदाहरणम् उक्त्वा अध्यापकेन एकः न्यायः पाठितः ।

माता - कः न्यायः ?

पुत्रः - ..............................।

माता - उत्तमम् ।

**IX. योगदर्शनम् अधिकृत्य सूचनाः उपयुज्य लघुटिप्पणीं लिखत ।**

**सूचनाः** - भारतीयदर्शनानि - योगदर्शनम् - पतञ्जलिः - अष्टाङ्गानि - आसनानि - मानवारोग्ये - योगादिनम्।

**X. अधोदत्तात् वाक्यात् क्त्वान्त - तुमुन्नन्त - ल्यबन्तरूपाणि विविच्य लिखत।** 3x1=3

बालः विद्यालयात् प्रत्यागत्य क्रीडाङ्कणं गत्वा क्रीडितुम् आरभत ।

**XI. उदाहरणानुसारं सन्धिच्छेदं लिखत।** 1x1=1

**उदा-** अक्षयत्वाच्च - अक्षयत्वात् + च।

क) महत्वाच्च - .......... + ........ ।

**XII. उदाहरणानुसारं विग्रहवाक्यं लिखत।** 1x1=1

**उदा-** कविसार्वभौमः - कविषु सार्वभौमः।

क) कविचक्रवर्ती - ..................... ।

**XIII. अधोदत्तेभ्यः पदेभ्यः ' हस्तः' इत्यर्थकं पदं चित्वा लिखत ।** 1x1=1

करः / करी।

**XIV. प्रादेशिकभाषया लिखत।** 1x5=5

महाभारतं व्यासमुनिना विरचितं भवति। महाभारते अष्टादशपर्वाणि सन्ति। इतिहासरूपेण अयं ग्रन्थः परिगण्यते। तत्र भीष्मपर्वणि उपनिषत्सारभूता भगवद्गीता अन्तर्भवति। कुरुक्षेत्रयुद्धभूमौ अर्जुनाय कृष्णेन दत्तः उपदेशः एव भगवद्गीता।

**XV - XVII प्रश्नेषु द्वयोः उत्तरं लिखत।** 2x4=8

**XV. श्लोकं पठित्वा अधोदत्तानां प्रश्नानाम् उत्तराणि लिखत।**

सर्वद्रव्येषु विद्यैव
द्रव्यमाहुरनुत्तमम्।
आहार्यत्वादनर्घ्यत्वा-
दक्षयत्वाच्च सर्वदा।।

क) सर्वद्रव्येषु श्रेष्ठं किम् ?

ख) श्लोकात् **श्रेष्ठम्** इत्यस्य समानार्थकपदं चित्वा लिखत।

ग) श्लोके कस्य महत्वं वर्णयति ?

घ) श्लोकात् एकं क्रियापदं चित्वा लिखत।

XVI. **अधोदत्तां खण्डिकां पठित्वा जीवनचरितरूपरेखां पूरयत।**



कैरळीभाषया विरचितम् उपनिषत्पठनम् अस्ति **तत्त्वमसि**। तस्य ग्रन्थस्य प्रणेता भवति डा.सुकुमार् अष़ीक्कोट्। वयलार्पुरस्कारः, केन्द्र-केरलसाहित्यअक्कादमी पुरस्कारः, राजाजीपुरस्कारः इत्यादिभिः समादृतोऽस्ति अयं ग्रन्थः। अष़ीक्कोट् महाशयः कण्णूर् जिल्लायाम् अष़ीक्कोट् देशे विद्वान् पि.दामोदरन्, के.टि माधवियम्मा दम्पत्योः पुत्रत्वेन १९२६ मेई २६ तमे दिने जातोऽस्ति। वाग्मी, अध्यापकः, साहित्यविमर्शकः, ग्रन्थकारः इत्यादिषु रङ्गेषु निष्णातोऽयं २०१२ जनुवरि २४ तमे दिने दिवङ्गतोऽभूत्।।

| | | |
|---|---|---|
| नाम | - | ............................। |
| जन्मतिथिः | - | ............................। |
| जन्मस्थलम् | - | ............................। |
| पितरौ | - | ............................। |
| पुरस्काराः | - | ............................। |
| कर्ममण्डलः | - | ............................। |
| ग्रन्थः | - | ............................। |
| देहवियोगः | - | ............................। |

XVII. **खण्डिकां पठित्वा अधोदत्तानां प्रश्नानाम् उत्तराणि लिखत ।**

साहित्यमण्डले विराजमानाः अनेके महात्मानः अपरनाम्ना प्रसिद्धाः भवन्ति। तेषु अन्यतमः भवति ए. आर्. राजराजवर्मा । पाणिनिना विरचितः संस्कृतव्याकरणग्रन्थः भवति अष्टाध्यायी। तद्वत् कैरलीभाषायां केरलपाणिनीयं नाम व्याकरणग्रन्थम् अपि अयं महाभागः व्यरचयत्। अतः सः केरलपाणिनिः इति पश्चात् प्रसिद्धोऽभवत्।

क) केरलपाणिनिः कः ?

ख) पाणिनिना विरचितः संस्कृतग्रन्थः कः ?

ग) ए. आर्. राजराजवर्मणा विरचितः व्याकरणग्रन्थः कः ?

घ) **प्रसिद्धोऽभवत्** - सन्धिच्छेदं लिखत ।